National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 64-69
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. शकुन्तलादाशः**
अतिथि-अध्यापिका(सहायकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**Correspondence:**
**डॉ. शकुन्तलादाशः**
अतिथि-अध्यापिका(सहायकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# स्मार्तधर्मपरम्परायाम् आह्निककृत्यानि

**डॉ. शकुन्तलादाशः**

**शोधसारः (Abstract)**

भारतीयसंस्कृतेः मूलाधारभूता धर्मपरम्परा मनुष्यजीवनस्य सर्वाङ्गीणशुद्धिं, अनुशासनं तथा आध्यात्मिकोत्कर्षं च साधयति। तत्र स्मार्तधर्मपरम्परा विशेषरूपेण गृहस्थजीवनस्य नित्यनैमित्तिककर्तव्यनिर्देशेन समाजव्यवस्थायाः स्थैर्यं स्थापयति। आह्निककृत्यानि नाम प्रातःकालादारभ्य रात्रिपर्यन्तं मनुष्येण अनुष्ठेयानि नित्यकर्माणि, यथा—प्रातःस्मरणम्, शौचम्, दन्तधावनम्, स्नानम्, सन्ध्योपासनम्, जपः, देवपूजा, ब्रह्मयज्ञः, वैश्वदेवः, अतिथिसत्कारः, भोजनविधिः, सायंसन्ध्या, रात्रिकृत्यं च। एतानि कर्माणि बाह्याचाररूपाणि यद्यपि भवन्ति तथापि अन्तःकरणशुद्धेः, आत्मसंयमस्य, सामाजिकसौहार्दस्य तथा ईश्वरानुसन्धानस्य साधनानि भवन्ति। स्मृतिग्रन्थेषु मनुस्मृतौ, याज्ञवल्क्यस्मृतौ, पाराशरस्मृतौ, धर्मसिन्धौ, निर्णयसिन्धौ च आह्निककृत्यानां विस्तृतवर्णनं दृश्यते। तेषां निर्देशानुसारं दिनचर्यायाः विन्यासः शारीरिकस्वास्थ्यं, मानसिकशान्तिं, धार्मिकनिष्ठां च संवर्धयति। विशेषतः सन्ध्योपासना, गायत्रीजपः, देवतार्चनं च आत्मिकविकासस्य प्रमुखसोपानानि इति प्रतिपाद्यते। एवं च आह्निककृत्येषु शुचिता, समयपालनम्, संयमः, दानशीलता, अतिथिसत्कारः इत्यादयः नैतिकमूल्यरूपेण अन्तर्निहिताः सन्ति। अद्यतनजीवने यद्यपि यान्त्रिकता, समयाभावः, पाश्चात्यप्रभावश्च दृश्यते, तथापि आह्निककृत्यानां प्रासङ्गिकता न न्यूनता गता। अपितु तनावपूर्णजीवने एतेषां पालनं मानसिकसमत्वं, अनुशासनं तथा सांस्कृतिकस्वरूपसंरक्षणं करोति। अतः स्मार्तधर्मपरम्परायाम् आह्निककृत्यविमर्शः आधुनिकमानवजीवनस्य पुनर्सन्तुलनस्य मार्गदर्शकत्वेन अपि ग्राह्यः।

निष्कर्षतया वक्तुं शक्यते यत् आह्निककृत्यानि धर्मस्य जीवितरूपाणि सन्ति, येषां समुचितपालनेन व्यक्तेः, समाजस्य, राष्ट्रस्य च नैतिकोन्नतिः सुनिश्चितीभवति।

**Key Words (मुख्यशब्दाः)**

स्मार्तधर्मः, आह्निककृत्यम्, नित्यकर्म, सन्ध्योपासना, स्मृतिग्रन्थाः, धर्मपरम्परा, शौचाचारः, देवपूजा, ब्रह्मयज्ञः, गृहस्थधर्मः

**प्रस्तावना**

धर्मानुकूलशारीरिकव्यापारमेव सदाचार इति कथ्यते। आचार एव मनुष्याणां प्रथमधर्मः परमधर्मश्च भवति । श्रुतिशास्त्रे विहिताचार स्मृतिशास्त्रे प्रत्यक्षतया अभिहितः । आचारेण युक्तो मानवः सर्वदा सुखं प्राप्नोति । आयु-विद्या-यशो-गुणान्वितश्च भवति ।अतः मनुना उक्तं –

**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्तः एव च ।**
**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः॥**[1]

किं च आचारात् विच्युतो मानवः सर्वदा दुःखं प्राप्नोति , तस्य क्रिया निष्फला भवति।अतः सर्वमूलम् आचारो भवति । उक्तं च-

**आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।**
**आचारेण तु संयुक्तः संपूर्णफलभाग् भवेत् ॥**

**एवमाचारतो दृष्टा धर्मस्य मुनयो गतिम् ।**

**सर्वस्य तपसो मूलमाचारं जगृहुः परम् ॥**[2]

वस्तुतः श्रुतिस्मृत्युदितो धर्मः मानवः परिपालनं कृत्वा इहलोके यशः कीर्त्तिञ्च प्राप्नोति । तथा मृत्योः अनन्तरं परमसुखं प्राप्नोति इति कृत्वा स्मृतिपुराणमहाभारतादिग्रन्थेषु एतद्विषये बहुषु उल्लिखितं वर्त्तते। चतुर्णामपि वर्णानां कृते धर्मपालनावसरे वर्णानां आचाराणाञ्च पालनं कर्त्तव्यम् इति धर्मशास्त्रकारैः विहितम्।

पुराणेषु आचारस्य प्रायः भेदद्वयं प्राप्यते।यथा- सदाचारः,शौचाचारश्चेति। धर्मशास्त्रे तु उभयः आचार इति संज्ञा। शौचाचारे वर्णितः आचारः नित्याचारपदेन सामान्यतः उपदिष्टः। एषः एव धर्मरूपेण चतुराश्रमिभिः सर्वैः परिपालनीय ।एतदेव पराशरस्मृतौ ऋषिभिः उत्थापितस्य प्रश्नस्य उत्तररूपेण व्यासदेवेन प्रतिपादितः । एतद् यथा-

**अथातो हिमशैलाग्रे देवदारुवनालये ।**

**व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥**

**मनुष्याणां हितं धर्मं वर्त्तमाने कलौ युगे।**

**शौचाचारं यथावच्च वद सत्यवतीसुत ॥**[3]

सर्वेषां साधारणम् अर्थात् सर्वेषाम् अनुष्ठानयोग्यं यत् कर्म तत् पराशरस्मृतौ षट् कर्म इत्यनेन गृह्यते।यथा-

**संध्या स्नानं जपो होमो देवतानाञ्च पूजनम् ।**

**आतिथ्यं वैश्वदेवञ्च षट् कर्मणि दिने दिने ॥**[4]

नित्याचार रूपेण नैकानि कर्माणि साधारणरूपेण सर्वेषां कृते विहितानि सन्ति। एतत् आह्निककृत्यरूपेण अपि उल्लिखितं वर्त्तते। मनुना एतद्विषये प्रतिपादितं यथा-

**मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।**

**पूर्वाह्न एव कुर्वीत देवतानां च पूजनम् ॥**[5]

साधारणरूपेण शय्यात्यागः, शौचः, दन्तधावनम्, स्नानम्, संध्या, तर्पणम्, दानम्, पञ्चमहायज्ञः, अग्निसेवनम्, भोजनम्, अर्थागमचिन्ता, स्वाध्यायोऽध्येतव्यः, तथा शयनम् एतानि कर्माणि समयानुसारं कर्त्तव्यानि भवन्ति।

**शय्यात्यागः-**

आह्निककृत्यानां प्रारम्भः शय्यात्यागेनैव भवति। यथाह याज्ञवल्क्यः-

**ब्राह्मे मुहुर्त्ते चोत्थाय चिन्तयेदात्मनो हितम् ।**

**धर्मार्थकामन्स्वे काले यथाशक्ति न हापयेत् ॥**[6]

अर्थात् ब्राह्मे मुहूर्त्ते उत्थाय पश्चिमेऽर्धप्रहरे प्रबुध्यात्मनो हितं करिष्यमाणं च वेदार्थसंशयांश्च चिन्तयेत् ।

**अथशौचम्-**

शुद्धिर्नाम शौचम् अर्थात् वेदोक्तानां कृत्यानां सम्पादनं शौचम् इति कथ्यते।शौचमिदं बाह्याभ्यन्तरभेदेन द्विविधम्। शौचप्रसङ्गे याज्ञवल्क्येन उक्तं यत्-

**गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ।**

**गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥**[7]

अनन्तरं शिश्नं गृहीत्वात्थोयोद्धृताभिरद्भिर्वक्ष्यमाणलक्षणाभिर्मृद्भिश्च गन्धलोपयोः क्षयकरं शौचं कुर्यात्। अतन्द्रितोऽनलसः। उद्धृताभिरद्भिरिति जलान्तः शौचनिषेधः। अत्र "गन्धलेपक्षयकरम्" इति सर्वाश्रमिणां साधारणमिदं शौचम् । मृत्संख्यानियमस्त्वदाष्टार्थ । यथाह मनुः-

**एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश ।**

**उभयोः सत्य दातव्या मृदः शुद्धिमभीप्सता ॥**[8]

मूत्रपुरीषोत्सर्गे सति शुद्धिमभीप्सता "मृदर्यादेय मर्थवत्" इत्युक्तत्वाज्जलसहिता मृदेका लिङ्गे दातव्या, गुदे तिस्रो मृदः , तथैकस्मिन्करे वामे । "शौचविद्दक्षिणं हस्तं नाधः शौचे नियोजयेत्। तथैव वामहस्तेन नाभेरुर्ध्वं न शोधयेत्" इति देवलवचनात्तस्यैवाधः शौचसाधनत्वात्तत्रैव दशमृदो दातव्यास्तत उभयोः करयोः सप्त दातव्याः ।यदा तूक्तशौचेनापि गन्धलेपक्षयो न भवति तदा "यावदपैत्यमेध्याक्तम्" इति वचनादधिकसंख्यापि मृद्यातव्या। ऋष्यश्रृङ्गेनोक्तं यत्-

**यस्मिन् स्थानं कृतं शौचं वारिणा तद्विशोधयेत् ।**

**न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत् ॥**[9]

**दन्तधावनम्-**

अभ्यङ्गोन्मर्दनादर्शदन्तधावाभिषेचं दन्तधावनं दन्तप्रक्षालनमपि दन्तधावनमिति। प्रातःकालीनकृत्येषु शय्यात्यागान्मुखप्रक्षालनाञ्च परं दन्तधावनं कर्त्तव्यम् । यथाह याज्ञवल्क्येन-

**शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः ।**

**प्रातःसंध्यामुपासीत दन्तधावनपूर्वकम् ॥**[10]

अर्थात् द्विजः शौचं कृत्वा दन्तधावनपूर्वकं प्रातःसंध्यामुपासीनं कर्त्तव्यम्।

दन्तधावनकालप्रसङ्गे दक्षेनोक्तं यत्-

**उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।**

**ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम् ॥**[11]

अर्थात् उषाकाले स्नानात्प्राग्येव शौचादनन्तरं दन्तधावनं कर्त्तव्यम्।दन्तधावनमन्त्रमप्यत्र अस्ति यथा-

**आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।**

**ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥**

इत्यत्र ब्रह्मचारिप्रकरणोक्तस्यापि संध्यावन्दनस्य पुनर्वचनं दन्तधावनपूर्वक-त्वप्रतिपादनार्थम्,दन्तधावननृत्यगीतादिकं ब्रह्मचारी वर्जयेत्। तन्निषेधादिति। पुनः नरसिंहपुराणे तु-

**दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्यताम् ।**

**सर्वकण्टकिनः पुण्याः क्षीरिणाश्च यशस्विनः ॥**

**खादिरश्च कदम्बश्च करञ्जश्च वटस्तथा ।**

**तिन्तिणी वेणुपृष्ठश्च भाम्रा निम्वस्तथैव च ॥**

**विल्वश्त अर्कश्चोदुम्बरस्तथा ।**

**एते प्रशस्ताः कथिता दन्तधावनकर्मणि ।।**[12]

अत्र विष्णुनापि उक्तं यत् वटासनार्कखादिरकरञ्जकरवीरसर्जरिमे - दापमार्गमालती ककुभविल्वानामन्यतमं कषायं कटुकं तिक्तं वा अशन आसनमिति प्रसिद्धम्। सर्जः, शालः, अरिमेदोविटखादिरः, मालती,

जाती, ककुभो, अर्जुनः, कषायं कटुकं तिक्तं केत्यन्त्यदप्यवहिता निषिद्धं बोद्धव्यम् इति ।

**स्नानम्-**

स्नानमिदं वाह्यशौचमिति ज्ञायते। प्रत्यहं ब्राह्ममूहुर्त्तेव स्नानं कर्त्तव्यम्। यथा-

**स्नानमद्धैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः ।**

**सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥**[13]

अर्थात् द्विजातीनां कृते प्रातःस्नानं यथाशास्त्रमद्धैवतैर्मन्त्रैः **"आपोहिष्टा"** इत्येवमादिभिर्मार्जनम् ,प्राणायाम पूर्वकं प्राणसंयमः,ततः सूर्यस्योपस्थानं सौरमन्त्रेण गायत्र्याः प्रतिदिवसं जपः कार्यः। प्रसङ्गेऽस्मिन् मनुनोक्तं यत्-

**नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।**

**देवताभ्यर्चनं चैव समिदाधानमेव च ॥**[14]

प्रत्यहं स्नात्वा देवर्षिपितृभ्यः उदकदानं, प्रतिमादिषु हरिहरादिदेव-पूजनं, सायं प्रातश्च समिद्धाहोमं कुर्यात् ।यमस्तु-

**प्रातःस्नायी च सततं द्वौ मासौ माघफाल्गुनौ ।**

**देवान् पितृन् समभ्यर्च्य सर्वपापैः प्रमुच्यते ॥**[15]

प्रातः शब्दश्चात्रोषः कालपरः। प्रातःस्नाय्यारुणकरग्रस्तां प्राचीमव-लोक्य स्नायादिति विष्णुवचनात्। इदञ्चानुदितहोमात्परम्। तस्य रात्रिषोडशरूपकालाधिकरणक-होमानुरोधेन तत्पूर्वमेव प्रातःस्नानात् तदन्तापकर्षन्यायात्। तच्चेदं धृतोदकेनैव आचान्तमनुगर्त वा निशिस्नानं न विद्यते इति । मनुनाऽपि –

**परकीयनीपानेषु न स्नायाच्च कदाचन ।**

**निपानकर्त्तुः स्नात्वा तु दृष्कृतांशेन लिप्यते ॥**[16]

इत्यत्र निरापनं जलाधारः। परकृतपुष्करिण्यादिषु न कदाचित्स्नायात्। तत्र स्नात्वा पुष्करिण्यादिकर्त्तुर्यत्पापं तस्यांशेन वक्ष्यमाणचतुर्थभागरूपेण संवध्यते। अकृतिकमनद्यसंभवे परकृतेऽपि पुष्करिण्यादौ प्राक्प्रदानात्पञ्चपिण्डानुद्धृत्य स्नातव्यम्। प्रसङ्गेऽस्मिन् याज्ञवल्क्येनोक्तं यत्-

**पञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिषु ।**

**स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च ॥**[17]

अर्थात् परवारिषु परसंवन्धिषु सर्वसत्वोद्देशेनात्यक्तेषु ग्रादिषु पञ्चपिण्डाननुद्धृत्य न स्नायात्। अनेनात्मीयोत्सृष्टाभ्यानुज्ञातेषु पिण्डोद्धारमन्तरापि स्नानमभ्यनुज्ञातम्। नद्यादिषु कथं तर्हित्याहस्नायान्नदीति । साक्षात्परम्परया वा समुद्रगाः स्रवन्त्यो नद्यः देवखातं देवनिमित्तं पुष्करादिउदकप्रवाहाभिपातकृत्सजलो महानिम्नप्रदेशो ह्रदः, पर्वताद्युच्चप्रदेशात्प्रसृतमुदकं प्रस्रवणम् ,एतेषु पञ्चपिण्डानुद्धरणेनैव स्नायात्। प्रत्यहं स्नानं कर्त्तव्यमिति।

**तर्पणम्-**

देवर्षीपितृन्नुद्दिश्य उदकार्पणं तर्पणम् इति बोध्यते । ब्रह्मयज्ञस्य अङ्गं भवति तर्पणम् । प्रत्यहं स्नानादनन्तरं तर्पणं कर्त्तव्यम् । उक्तं हि –

**यदेव तर्पयत्यद्धिः पितृन्स्नात्वा द्विजोत्तमः ।**

**तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् ॥**[18]

पाञ्चयाज्ञिक श्राद्धसंभवे विधिरयम्। यत्र स्नानानन्तरमुदकतर्पणं द्विजः करोति तेनैव सर्व नित्यश्राद्धफलं प्राप्नोति। योगीयाज्ञवल्क्येनोक्तं यत्-

**यत्राशुचिस्थलं वा स्यादुदके देवताः पितृन् ।**

**तर्पयेत् यथाकाममप्सु सर्वं प्रतिष्ठितम् ॥**[19]

अत्र च जलसन्ध्यावन्दनपक्षे उपस्थानपर्यन्ता सन्ध्या जले, ततस्तर्पणम्।तत उतीर्य शुष्कवाससा अष्टानाङ्गन्यासादिसहितगाय-त्रीजपो ब्रह्मयज्ञश्च स्थूले कार्यः।यदाद्रवासाः कुरुत इत्यादिना जले जपमात्रनिषेधात् तर्पणं कर्त्तव्यम् । प्रसङ्गेऽस्मिन् बौधायनेनोक्तं यत्-

**स्रवन्तीषु निबद्धासु त्रयो वर्णा द्विजातयः ।**

**प्रातरुत्थाय कुर्वेरन् देवर्षि पितृतर्पणम् ॥**

**निबद्धासु न कुर्वीरन्नंशभाक् तत्र सेतुकृत् ।**

**तस्मात्परकृतान् सेतुन् कूपांश्च परिवर्जयेत्॥**[20]

तथा देवतास्तर्पयित्वा पितृतर्पणमनुतीर्थम् । शंखेनाऽपि उक्तं यत्-नेष्टकाचिते पितृत्स्तर्पयेत् वापीतडागोदपानेषु सप्त पञ्च त्रीन्वा पिण्डानुद्धृत्य देवान् पितृन्स्तर्पयेत् ।यथाह शातातपः-

**तर्पणन्तु शुचिः कुर्यात्प्रत्यहं स्नातको द्विजः।**

**देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्॥**[21]

अर्थात् द्विजः क्रमेण देवेभ्यः ऋषिभ्यः पितृभ्यश्च तर्पणं कुर्यात्। प्रत्यहं स्नात्वा देवर्षिपितृभ्य तर्पणमुदकदानं च कर्त्तव्यम् ।

**दानम्-**

स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वात्पत्तिर्दानम्। युगानुसारं धर्मः परिवर्त्तितो भवति। अतः मनुना चतुर्युगाणां चत्वारः धर्माः कथिताः। तेषु धर्मेषु कलौ दानधर्म विशिष्यते । यथा-

**तपो धर्मः कृतयुगे त्रेतायां ज्ञानमुच्यते।**

**द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे॥**[22]

वैदिककालादारभ्य धर्मशास्त्रान्तरेषु च दानस्य महत्वं विद्यते। दानस्य वैदिकस्वरूपविषये ऋग्वेदे उक्तमस्ति-

**उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सहते सूर्येण ।**

**हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्रतिन्त आयुः॥**[23]

**"दीयते इति दानम्"** मल्लिनाथेन प्रतिपादितम् । दानस्य षडङ्गानि विद्यन्ते। यथा- दाता,प्रतिग्रहीता,श्रद्धा,धर्मयुक्तदेयम्,समुचितः कालः,समुचितं स्थानञ्चेति । उक्तं हि-

**हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतम् ।**

**प्रतिगृह्णन्नविद्वांस्तु भस्मीभवति दारुवत् ॥**

**स्वर्णदीऽशुतस्वाध्यायहीनः प्रतिगृह्णान्नाग्निसंयोगेन।**

**दारुवद्धस्मीभूतो भवति पुनरुत्पत्तिं न लभते ॥**[24]

अर्थात् दानं सत्पात्रैव दातव्यम् । हिरण्यं,भूमि,गां,अन्नं, तिलदानादिकं यदि स्वाध्याहीनः अविद्धांसुनां दीयते तर्हि तद्दानं दारुवत् भस्मीभवति पुनरुत्पत्तिं च न लभते ।

याज्ञवल्क्येन उक्तं यत्-

**दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः।**

**याचितेनापि दातव्यं श्रद्धापूतं स्वशक्तितः ॥[25]**

प्रतिदिवसं शक्त्यानुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकुटुम्बाविरोधेन दातव्यम्। निमित्तेषु चन्द्रोपरागादिषु विशेषतोऽधिकं यत्नेन दातव्यम्। याचितेनापि श्रद्धापूतमनसूया पवित्रीकृतं शक्त्या दातव्यम्। "याचितेनापि दातव्यम्" इति वदता यथोक्तं पात्रं स्वयमेव गत्वा आहूय वा यद्दानं तन्महाफलमुक्तम्। तथा च स्मरणम्-

**गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम् ।**

**सहस्रगुणमाहूय याचिते तु तदर्धकम् ॥ इति**

दानस्य प्रकारभेदविषये अधस्तात् किञ्चित् संक्षिप्तरूपेण प्रस्तूयते-

**आदौ साधारणतया नित्यनैमित्तिककाम्यभेदेन दानं त्रिविधम्।**

**नित्यदानम्- बलिबैश्वदेवानन्तरं दीयमानं नित्यं ।**

**नैमित्तिकदानम्-ग्रहणादिविशिष्टावसरेषु दीयमानंनैमित्तिकम्।**

**काम्यदानम्-सन्तानोत्पत्तिविजयादिषु दीयमानं दानं काम्यम् ।**

एवमेव प्रकारेण दानस्य बहवः भेदाः दृश्यन्ते । दानं सर्वथा सुपात्रैव दातव्यम् ।

**पञ्चमहायज्ञः-**

पञ्चमहायज्ञः गृहस्थानां नित्यकर्मरूपेण विहितः। भूतयज्ञः, मनुष्ययज्ञः, पितृयज्ञः, देवयज्ञः, एवञ्च ब्रह्मयज्ञः ।

एते पञ्चमहायज्ञाः इति ज्ञायन्ते । प्रसङ्गेऽस्मिन् मनुना उक्तं यत्-

**पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।**

**कण्डनी चोदकुम्भश्च वध्यते यस्तु वाहयन् ॥**

**तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।**

**पञ्च कृत्वा महायज्ञाः प्रत्यहं गृहमेधिनम् ॥[26]**

इत्यत्र पशुवधस्थानं सूना इति वोध्यते। गृहस्थस्य पञ्च हिंसावीजानि स्थानानि यथा – चुल्ली,पेषणी, उपस्करो, कुण्डनी, उदकुम्भश्चेति। तासां चुल्यादिस्थानानां यथाक्रमं पापनाशार्थं गृहस्थानां पञ्चमहायज्ञाः प्रतिदिनं अनुष्ठानं कर्त्तव्यम् । पुनश्च-

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।**

**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥[27]**

अर्थात् अध्यापनमध्ययनं च ब्रह्मयज्ञः, तर्पणं पितृयज्ञः, अग्नौ होमो देवयज्ञः, भूतर्बलिभूतयज्ञः, अतिथिपूजनं मनुष्ययज्ञः इति ।याज्ञवल्क्येनाऽपि उक्तं यथा-

**बलिकर्मस्वाधाहोमस्वाध्यायातिथिसत्क्रियाः।**

**भूतपित्रमरब्रह्ममनुष्याणां महामखाः ॥[28]**

बलिकर्म भूतयज्ञः, स्वधा पितृयज्ञः, होमो देवयज्ञः, स्वाध्यायो ब्रह्मयज्ञः, अतिथिसत्क्रिया मनुष्ययज्ञः । एते पञ्चमहायज्ञाः अहरहः कर्त्तव्याः नित्यत्वात् । गौतमवचनं तु –

"**देव-पितृ-मनुष्य-भूतर्षिपूजकः**[29]" अत्र पूजकशब्दो देवादिषु प्रत्येकं सम्बोध्यते। गृहस्थो नित्यं देवादिपूजकः स्यात् । तत्र देवपूजा वैश्वदेवं शाकलहोमाद्याग्निकार्यं च । पितृपूजां मनुराह-

**एकमप्याशयेद्विप्रं पित्र्यर्थे पाञ्चयज्ञिके।**

**न चैवात्रशयेत्कांचिद्वैश्वदेवं प्रति द्विजम् ॥[30]**

पितृप्रयोजने पञ्चयज्ञान्तर्गते एकमपि ब्राह्मणं भोजयेत् ।पुनः मनुनाऽपि उक्तं यत्-

**पञ्चैतान्यो महायज्ञान्न ह्यापयति शक्तितः ।**

**स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते ॥[31]**

अर्थात् यथाशक्तिः प्रत्यहं पञ्चमहायज्ञानुष्ठानं कर्त्तव्यम् । गृहस्थानां सूनादोषनिराकरणादित्यर्थः।

**अग्निसेवनम्-**

देवऋणमपाकरणाय प्रत्यहमग्निसेवनं कर्त्तव्यम् ।अग्निकार्यं संध्याप्रातः उभयोरपि कुर्यात् । ततः संध्योपासनानन्तरं द्वयोः संध्ययोरग्निकार्ये अग्नौ कार्यं समित्प्रक्षेपादि यत्तत्कुर्यात् स्वगृह्योक्तेन विधिना कार्यम् । यथा-

**अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम् ।**

**कुरुष्वेत्यभ्यनुज्ञातो हुताग्नौ पितृयज्ञवत् ॥**

**हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः।**

**यथा लाभोपपन्नेषु रौप्येषु च विशेषतः ॥[32]**

अनन्तरमग्नौ करिष्यन्घृतप्लुतं घृताक्तमन्नमादाय ब्राह्मणान् पृच्छेत् "अग्नौ करिष्ये" इति। घृतग्रहणं सूपशाकादिनिकृत्यर्थम्। ततस्तैः कुरुष्वेत्यभ्यनुज्ञातः प्राचीनावीती शुद्धमन्नमुप-समाधाय मेक्षणेना-दायावदानसंपदा जुहुयात् "सोमाय पितृयज्ञे स्वधा मम", अग्नये काव्यबाहनाय स्वधा मम इति पिण्डपितृयज्ञकल्पेन अग्नौ हुत्वा मेक्षणमनुप्रहृत्य हुतशेषं मृन्मयवर्जयथालाभोपपन्नेषु विशेषतो रौप्येषु पित्रादिभाजनेषु दद्यात्, न वैश्वदेवभाजनेषु। समाहितोऽनन्यमनस्कः। अत्र अद्यप्यग्नावित्यविशेषेणोक्तं तथाप्यहिताग्नेः सर्वाधानपक्षे औपासनाग्नेरभावात् पिण्डपितृयज्ञानन्तरभाविनि पार्वणश्राद्धे विहृतदक्षिणाग्नेः संनिधानाद्दक्षिणाग्नौ होमः, कर्म स्मार्त्त विवाहाग्नौ इत्यस्यापवाददर्शनमत्र दृश्यते । बौधायनेनोक्तं यत्-

**ब्राह्मो मूहुर्त्तमुत्थाय काले एव प्रातरग्निहोत्रं जुहुयात् ।**

**रात्रेः पश्चिमो यामः पञ्चघटिकाविशेषो ब्राह्मो मुहूर्त्तः ।।[33]**

**भोजनम्-**

आहारप्रक्रिया भोजनमिति कथ्यते । नित्यकर्मसु भोजनम् अपरिहार्यम् । यतोहि-

**आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः ।[34]**

**स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ।**

अर्थात् शुद्धाहारात् सत्त्वशुद्धिः, शुद्धसत्त्वादेव सत्यज्ञानं अविचल-स्मृतिः जायते।

अविचलस्मृतिः मोक्षमार्गमुन्मोचयति ।मनुना उक्तं यत्-

**अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।**

**आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्चिघोसति ॥[35]**

इति वेदस्य अनभ्यासः,आचारवर्जनम्,आलस्यम्,अन्नदोषश्च एते चत्वार दोषाः भोजनसम्बन्धितः यतः शुद्धाहारः मोक्ष हेतुरिति । मनुनाऽपि-

**देवानृषीन्मनुष्यांश्च पितृन्गृह्याश्च देवताः ।**

**पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् ॥[36]**

गृह्याश्च देवता इत्यनेन भूतयज्ञः उक्तः । पञ्चयज्ञानुष्ठानस्य **"अवशिष्टं तु दम्पती"** इत्यनेन शेषभोजनस्य च विहितम् । एतस्मिन् विषये देवलो यथा-

**प्राङ्मुखोन्नानि भुञ्जीत शुचिः पीठमवस्थितः** ।[37]

बौधायनस्तु प्रक्षालितपाणिपादो आचम्य शुचौ संवृते देशेऽन्नमुषहृतमुपसंगृह्य कामक्रोधलोभमोहानपहृत्य सर्वाङ्गुलिभिः शब्दमकुर्वन् प्राश्नीयान्न पिण्डशेषं पाव्यामुत्सृजेत् । उपहृतामुपनीतम्। पुनश्च मनुः-

**न भुञ्जीतोद्धृत स्नेहं नातिसोहित्यमाचरेत् ।**
**नातिप्रागे नाति सायं न सायं प्रातराशितः ॥[38]**

अर्थात् उद्धृतस्नेहं पिण्याकादि न भुञ्जीत। अतितृप्तिं वारद्वयेऽपि न कुर्यात्। जठरं पूरयेदर्धमन्नेनार्धं जलेन च। वायोः संचरणार्थं तु चतुर्थमवशेषयेत्। इत्यादि विष्णुपुराणवचनात् सूर्योदयकाले सूर्यास्तसमये च भोजनं कुर्यात् न। प्रातराशितोऽतितृप्तः सायं न भुञ्जीत ।

**स्वाध्यायोऽध्येतव्यः-**

स्वपितृपितामह परम्परया प्राप्त स्ववेदशाखा स्वाध्यायः इति उच्यते। स्वकीयत्वेन विहितः अध्यायः स्वाध्यायः,सृष्ठु आवृत्य अध्यायः अधीतिः स्वाध्यायः इति । सुकृताय आवृत्य अधीतिः स्वाध्यायः इत्यादिना स्ववेदशाखाः अध्ययनमेव स्वाध्यायः शब्देन विहितम्। स्वाध्यायस्य शाब्दिक अर्थं भवति- "स्वयं अध्ययनम्"। शुद्धपूतजीवनस्य कृते सत्सङ्गः स्वाध्याय उभौ द्वौ आधारस्तम्भौ एव वर्त्तेते । स्वाध्यायस्य जीवननिर्माणे महत्त्वपूर्णं योगदानं भवति । प्रत्यहं वेदाध्यापनं ब्रह्मयज्ञः इति मनुः-

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।**
**होमो दैवे वलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥[39]**

अध्यापनं शब्देनात्र अध्ययनमपि गृह्यते। जपोऽहुतमिति वक्षमाण-त्वात् । अतोऽध्यापनमध्ययनं च ब्रह्मयज्ञः ।यथा-

**अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः ।**
**गुरौ वसन्संचिनुया ब्रह्माधिगामिकं तपः ॥[40]**

मनुस्मृतौ वेदाध्ययनविधिः वर्णितो यथा जातकर्मादिउपनयनपर्यन्तेन संस्कृतो द्विजः गुरुकुले वसन् शनैरत्वरया वेदग्रहणार्थं तपोऽभिहिताभिधास्यमान नियमकलापरूमनुतिष्ठेत्।

**वेदमेव सदाभ्यस्येत्तपस्तप्स्या द्विजोत्तमः ।**
**वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥[41]**

तपस्तप्स्यन् द्विजः सदा वेदाभ्यासः कुर्यात् । अतः वेदाभ्यासो विप्रस्य परमः तपः इति उच्यते ।

**स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः ।[42]**

वेदाभ्यासनिरततितिक्षायुक्तं पञ्चमहायज्ञानुष्ठाननिरतं महापातक-जन्यापि पापानि न स्पृशन्ति इति। याज्ञवल्क्यस्मृतौ प्रतिपादितम् यथा-

**वेदाभ्यासरतं दान्तं पञ्चयज्ञक्रियापरम् ।**
**नष्टासन्तीह पापानि महापातकजान्यपि ॥**[43] इति

**शयनम्-**

भोजनोत्तरकर्मसु शयनविधिः अन्यतमः। प्रसङ्गेऽस्मिन् याज्ञवल्क्ये-नोक्तं-

**उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तामुपास्य च।**
**भृत्यैः समावृतो भूत्वा नाति तृप्तोथ संविशेत् ॥[44]**

इत्यत्र संविशेत् पदस्य शयीत इत्यर्थः । पुनः विष्णुनाऽपि-

**कृतपादादि शौचस्तु भुक्त्वा सायं ततो गृही।**
**गच्छेच्छय्यामस्फुटितामेकदारुमयीं नृप ॥**
**नाविशालां न वा भग्नां नासमां मलिना न च।**
**न च जन्तुमयीं शय्यामधितिष्ठेदनावृताम् ॥**
**प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप।**
**सदैव स्वपतः पुंसो विपरीतन्तु रोगदम् ॥[45]**

अर्थात् भोजनादनन्तरमापद-शौचं भूत्वा शयनं कर्त्तव्यम्। नार्द्रपादः न नग्नो,नोच्छिष्टो, स्नायात् पुनः शय्यामपि नाविशालः, न भग्नः, एवञ्च एकदारुमयी भवेत् । न जन्तुमयीं शय्यायामधितिष्ठेत्। प्राच्यां दिशि शिरं कृत्वा शयनं कर्त्तव्यम् । प्रसङ्गेऽस्मिन् मार्कण्डेयपुराणे लिखितमस्ति प्राक्शिरः शयने विद्यालाभः, दक्षिणदिशि शिरं कृत्वा शयने धनमायुश्च बृद्धिः, पश्चिमे प्रवला चिन्ता हानिश्च तथा उत्तरदिशि शिरं कृत्वा शयने मृत्युर्भवति।

एवमुक्तेन प्रकारेण स्त्रियं गच्छन् क्षामां गच्छेत् । क्षामता च तस्मिन्काले रजस्वलाव्रतेनैव भवति । अथ चेन्न भवति तदा कर्त्तव्या क्षमता पुत्रोत्पत्त्यर्थमल्याऽस्निगधभोजनादिना । **"पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियः"** इति वचनात् । यदा युग्मायामपि रात्रौ शोणिताधिक्यं तदा स्त्र्येव भवति पुरुषाकृतिः। अयुग्मायामपि शुक्राधिक्ये पुमानेव भवति स्त्रियाकृतिः, कालस्य निमित्तत्वात् शुक्रशोणितयोश्चोपादानकारणत्वेन प्राबल्यात् तस्मात्क्षामा कर्त्तव्या। मघामूलनक्षत्रे वर्जयेत्। चन्द्रे चैकादशादिशुभस्थानगते चकारत्पुंनक्षत्रे शुभयोगलग्नादिसंपतौ सकृदेकस्यां रात्रौ न द्विस्त्रिर्वा। ततो लक्षणैर्युक्तं पुत्रं जनयति । पुमान् प्रतिहतपुंस्वः। एवं शयनविधिः निर्धारितः ।

**उपसंहारः**

वस्तुतः स्मार्तधर्मपरम्परायाम् आह्निककृत्यानि मानवजीवनस्य शुद्धेः, अनुशासनस्य, आध्यात्मिकविकासस्य च मूलाधाररूपेण प्रतिष्ठितानि सन्ति। प्रातःस्मरणात् रात्रिकृत्यपर्यन्तं नित्यकर्माणां विधिपूर्वकं पालनं केवलं धार्मिकाचारः न, अपितु नैतिकजीवनस्य आधारः अस्ति। एतेषां माध्यमेन व्यक्तित्वविकासः, सामाजिकसौहार्दं, सांस्कृतिकसंरक्षणं च साध्यते। आधुनिकयुगेऽपि आह्निककृत्यानां महत्त्वं अविकलमेव वर्तते। अतः एषां संरक्षणं पालनं च भारतीयधर्मपरम्परायाः स्थैर्याय तथा मानवकल्याणाय अत्यावश्यकम् अस्ति।

**आकरग्रन्थाः –**

१. मनुस्मृतिः (मेधातिथिभाष्यसहिता) - एसियाटिक सोसाइटि आफ वेङ्गल, कलिकता, १९३९।

२.याज्ञवल्क्यस्मृतिः(समिताक्षरा)चौखम्बासंस्कृतसीरिज , वाराणसी- १९६८

३. धर्मशास्त्र का इतिहास , सं.अर्जुन चौवे काश्यप, उत्तरप्रदेश हिन्दी संस्थान, लखनउ,१९८० ।

४.अष्टादशस्मृतिः, सम्पादकः- प.मिहिरचन्द्र, नागप्रकाशक, जवाहर-नगर, दिल्ली।

५.धर्मशास्त्र का इतिहास, डा.पी.वी, काणे, अनुवादः-अर्जुनचौवे-काश्यप, उ.प्र.हिन्दीसंस्थानम्, लखनऊ- १९६१

६.धर्मशास्त्रशब्दकोशः, पं. कुलमणिमिश्रशर्मा, ओडिशाराज्यपर्यटन क्रीडासंस्कृतिनिर्देशालय, भुवनेश्वरम्,१९८१

७.धर्मशास्त्रस्येतिहास, प्रो.जयकृष्णमिश्रः, चौखम्बासंस्कृत सीरीज अफिस, वाराणसी, २०१०

८.धर्मसिन्धुः, श्रीकाशीनाथ उपाध्यायः, चौखम्बासंस्कृतसीरिज, वाराणसी, १९६८

**पाद टिप्पणी :-**

[1] म.स्मृ.1.108
[2] म.स्मृ.1.109-110
[3] परा.स्मृ-पृ-1-2
[4] परा.स्मृ.पृ-39
[5] म.स्मृ-4.152
[6] याज्ञ.स्मृ-1.115
[7] या.स्मृ.1.17
[8] म.स्मृ-5.136
[9] ऋष्यशृङ्ग-पृ.-188
[10] या.स्मृ.पृ-98
[11] या.स्मृ.1.98
[12] आ.चि.पृ-33
[13] या.स्मृ.1.22
[14] म.स्मृ.2.176
[15] आ.चि.पृ-39
[16] म.स्मृ-4.201
[17] या.स्मृ.1.159
[18] म.स्मृ.3.283
[19] आ.चि.पृ-102
[20] आ.चि.पृ-103
[21] आ.चि.पृ-101
[22] म.स्मृ.1.86
[23] ऋ.10.107.2
[24] म.स्मृ.4.188
[25] या.स्मृ.1.203
[26] म.स्मृ.3.68
[27] म.स्मृ.3.70
[28] या.स्मृ.1.102
[29] गौ.ध.सू.96
[30] म.स्मृ.3.83
[31] म.स्मृ.3.71
[32] या.स्मृ.1.236-237
[33] बौ.ध.सू.2.10.7.22
[34] ध.द्व.पृ-182
[35] म.स्मृ-5.4
[36] म.स्मृ.3.117
[37] आ.चि.पृ-199
[38] म.स्मृ.4.62
[39] म.स्मृ.3.70
[40] म.स्मृ.2.164
[41] म.स्मृ.3.166
[42] भवसन्तरणोपनिषत् 2.17
[43] या.स्मृ.3.310
[44] या.स्मृ.1.114
[45] आ.चि.पृ-225